
कुलपूजनचान्द्रिका

KULPŪJAN CHĀNDRIKA



बाबूलाल शुक्ला

THE KŪLAPUJANA CHANDRIKĀ

OF

ŚRI CHANDRA ŚEKHAR, ŚARMĀ

Critically Edited for the first time with Introduction and Index

By

Professor Bāboolāl Shukla Shāstrī

M. A., SĀHITYĀCHĀRYA,

BHARATIYA VIDYA PRAKASHAN

DELHI VARANASI

Publisher :

Bharatiya Vidya Prakashan.

1. I.U.B. Jawaharnagar, Bungalow Road, Delhi-110007.
2. Post Box 1108, Kachauri Gali, Varanasi-221001. (India)

Edition : 1989

PRICE : Rs. 40-00

ISBN. 81-217-0036-6

Printed by :

Naveen Printers,

Delhi-110041

श्रीचन्द्रशेखरशर्म-प्रणीता

कुलपूजनचन्द्रिका

सा च इदम्प्रथमतया भूमिकापरिशिष्टादिभिः समलङ्कृत्य

आचार्य बाबूलाल शुक्ल शास्त्रिणा एम. ए. साहित्याचार्यादि विरुद्भाजा
मध्यप्रदेश शासनेन (साहित्य एकादमी) सम्प्राप्त सम्मानेन, प्राध्यापक
शाजापुरस्थेन शासकीय महाविद्यालयप्राध्यापकेन संस्कृता

भारतीय विद्या प्रकाशन
दिल्ली वाराणसी
(भारत)

प्रकाशक :

भारतीय विद्या प्रकाशन

१. १, यू० बी० जवाहरनगर, बंग्लोरोड़, दिल्ली-११०००७.

२. पो० बो० ११०८, कचौड़ीगली, वाराणसी-२२१००१.

प्रथम संस्करण, १९८९,

मूल्य : ४०-००

ISBN. 81-217-0036-6

मुद्रक : नवीन प्रिंटर्स

दिल्ली-११००४१

ACKNOWLEDGEMENT

Acknowledgement:—

I am thankful to Dr. L.N. Shukla Sanskrit college Indore for lending me his valuable Ms. of Kulapūjāna Chandrikā to edit this book. My heartfelt thanks to Dr. Rudradeva Tripathi, Research and Publication Officer of Birlā-Shodha Kendra, Ujjain. I am also thankful to Shri Kishore Chand Jain, the Proprietor of Bhāratīya Vīdyā Prakāśan, Delhi and Vāranasi who took interest and published this valuable book, and to Dr. B.L. Dwivedi Retired Principal Maharajawada Inter-college for his kind assistance.

Kalidāsa Akedemi,
Ujjain.

Baboolal Shukla, Shastri

INTRODUCTION

The Kulpūjana Chandrikā is a collection dealt with in various Tāntric works and called Tantra. This was written by Chandra Śekhar Śarma who was a high souled personage and who attained all the māntric powers. The period of Chandra Śekhar Śarma is uncertain but the suffix Śarma to his name shows that he might be of Brāhman caste of a reputed family,

This edition of Kulpūjana Chandrikā is based on two manuscripts in which one complete manuscript belongs to my own traditional collection. It is written in devanāgari characters and has 29 folios. The second manuscript is lent by my friend Shri Dr. L.N. Shukla of Indore. This manuscript is also written in Devanāgari characters and has 30 Folios and complete.

TANTRA, ĀGAMA AND SAMHITĀS.

Under the wide scope of Sanskrit Literature apart from Religion and Philosophv, there is a section of Āgama, which includes Samhitā and Tantra. The scholars have surveyed about two thousand such texts and some of them have been published. But many of such important texts are still unpublished. Such texts are divided into four kinds according to their subiect viz. (1) Jñān, (2) Yoga, (3) Kriyā and (4) Charyā. *Jñān* includes explanatory texts dealing with directions and acquisition. *Yoga* is a term for activities dealing with a mind. *Kriyā* deals with the diety, the construction of its temple and worship according to the sacred precepts, *Charyā* means related activity of worship in accordance with thc relevant situations centred on social environment. Sometimes the texts

deals with more than one of the above subject, The author is independent in their matter and it is observed that the texts are also free from these limitations.

Finally Tantra can be deemed such a text book which deals with such graded principles leading to Jñāna by means of aboration. These Tantras are included in Āgama and Samhitā. Āgama is more or less bounded by Traditions. Samhitā is a collection of precepts dealing with sacred traditional works. These are many. Facts and factions regarding their discriminating elements. But broadly speaking Āgamas, such texts which deals with the worship of ŚIVA and Śakti and that is the main subject of disenssion. In the same way the texts dealing with Viṣnu and Mahā Lakṣmī come under Samhitā. The texts dealing with such literature and subject-matter are called Tantra. In common. Samhitā is followed by Vaiṣnawas and Āgama by Śaivas and they are also termed as Śaivāgama. But those who are Śākta follow Tantra according to their principles and traditions with devotion and in a rigid manner.

Keeping in view its meaning and wide scope the laxicon Shabdar the Chintamani has described it in this manner :—

सर्गश्च प्रतिसर्गश्च मन्त्रलक्षणमेव च ।
देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम् ।।

तथैवाश्रमधर्मश्च मन्त्रसंस्थानमेव च ।
संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः ।।

उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च ।।

कोषस्य कथनञ्चैव व्रतानां परिभाषणम् ।
शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम् ।।

हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्मो दानधर्मो युगधर्मस्तथैव च ।।

व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ।।

This etymology of this term *Tantra* is elaborate as well as simple also. This implies all the Tantra texts whether they belong to any system of it because this explanation is pervasive and includes all the details. Similarly the etymology of Viṣṇu Samhitā deals with its application also and is of grasping nature.

"सर्वेषाञ्चैव तन्त्र्यन्ते त्रायन्ते च भयाज्जनाः ।
इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते ।।"

The details of religion etc. given by Lord Śiva in response to the questions full of curiosity and compassion by goddess Pārvatī are called Āgama and its definition is thus given in Padma-Samhitā—

"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने ।
मतञ्च वासुदेवस्य तस्मादागम उच्यते ।।

सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम् ।
साधनञ्चैव सर्वेषां पुरश्चरणमेव च ।।

षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तं तस्मादागम उच्यते ।।"

These Āgamas, whose subject matter is related to religion and Philosophical deliberations are numbered as 28. The Āgamas included in this Śaivagama are Kāmika, Yogaja, Chintya, Karaṇa, Ajita, Dīpta, Sūkṣama, Sahasra, Anśumad-Bheda, Suprabheda, Vijaya, Niswāsa, Swayambhuva, Anila, Veera, Raurawa, Mukutaka, Vimala, Chandra Gñāna, Bimba, Prodgīta, Lalita, Siddhha, Sanātan, Swokta, Parameśwar, Kiraṇa and Vātoola. In these Āgama texts, the details of religious precepts and execution related to the Tantra and dealt with. *SAMHITĀ*—This class of texts is very important because its scope is very elaborate and secondly its original text includes a scope of twelve—thousand verses. These Samhitās are usually found in the class of Vaiṣṇava-Tantra. This

fact has been pointed in the following saying of Pauṣkar Samhitā :—

> द्विषट्सहस्रपर्यन्तं संहिताख्यं सदागमम् ।
> ये चान्ये चान्तराला वै शास्त्रार्थेनाधिका शतैः ।
> सर्वेषां संहिता संज्ञा बोद्धव्या कमलोद्भव ।।"

In Sanskrit Literature no definite account is found as regards the number of Samhitās in this section and those which have come to light from amongst them. But whatever facts have been-available they are numbered thus :—Ahirledhnya, Īśwar, Kapinjala, Jaya, Paraśraya, Padma, Brihat-Brahma, Bhārdwaj, Sātvata, Śree Praśna, Viṣnu, Viṣṇutilaka, Lakṣmī, Māricha, Atri, Parama and Pauṣkara. But in the introduction of Pancharātra Samhitā Schrocder has given the number of the known Samhitās in this section as two hundred fifteen. Amongst them the Samhitās of Agastya, Anirudhdha, Upendra, and Kāśyapa though available, have not yet been published.

In addition to Āgama and Samhitā texts under Tantra, its related and explantory books such as Rahasya are also considered e.g. Śaiva Rahasya, Brahma Rahasya and Viṣṇu. Rahasya. The subject-wise differentiations of such books under Tantra is given in Yāmala and Dāmara. The etymology according to Yāmala is given thus :—

> सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
> क्रमसत्रं वर्णभेदो जातिभेदस्तथैव च ।
> युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम् ।।"

Some of the texts enumerated in Yāmala class are as follows :—Brahmā, Viṣṇu, Rudra, Ganeśa, Āditya,Jayadratha and Śakti. In these Rahasyatexts under Tantra traditions Dāmaras are also included with yāmalas such as Yoga, Śiva, Durgā, Saraswatī, Brahmā and Gāndharva.

This Tantra literature is divided as Vaidika and Non-Vaidika also. The Vaidika section is regarded as Dakṣina nārga and

Avaidik (Non-Vaidka) is as Wām-Mārg. Thus this Tāntrika literature had clearly a broad scope. There are numberless texts in it and the reference given in such texts bring to light much information of other texts, the study of which reveals a lot of facts.

THE *Kula Pūjana-Chandrikā*

As discussed above there are both the forms Vām and Dakṣina of Kūl-Pujan i.e. worship in family rites. This texts of Kula Pūjan Chandrikā follows and enhances the Vāma Mārga i.e. The leftist way of worship. Here the term Kul means Śakti according to the Saying of Tantra—कुलं शक्ति रिति प्रोक्तम्' and the union of this Kul with that of Akul i.e. Śiva is called कौल "कुलेऽकुलस्य सम्बन्ध: कौलमित्यभिधीयते" for the accomplishment of this union the worshipper of श्रीचक्र is also conventionally called 'कौल'.

In the external worship of श्रीचक्र after Dakṣina and Vām nyāsa, पात्रासादन or the instruments or the impliments of the instruments are institutcd. But in Vāma-Mārga there is a special performance of दूतीयाग and the use of Five-Makara in the fixing of a pot is essential. 1 Matsya, 2 Mānsa 3. Mīna 4 Mudrā and 5 Maithuna are not to be employed by every worshipper in the practice of कुलाचार. The worshipper has first to be concentrated in शाक्तदीक्षा. Then after muttering of the spells when one fact that he is realising Siddhi he has to fulfil क्रमदीक्षा and लघु पूर्णाभिषेक and then the consecration of आचार and कल्प is adopted. This is called शाक्ताभिषेक. Then the worshipper of Śakti i.e. शाक्ताभिषेकी becomes an possessor of वीरकल्प. This worship converts a man from beasthood to Vīra. Such a Vīra is either mānava Vīr or Dānava-Vīra. The first kind is of Viśiṣṭha and the second of Rāwaṇa. Such a mānava Vīra completing Purvābhisheka becomes a Kaul. This is termed as Kaulābhiṣeka also. A worshipper, who has installed himself in such an Abhiṣeka is authorised of worship with and use of Pancha Makar or Makar-Panchaka.

In this Kula Pūjana Chandrikā the author has first discussed the Adhikār and has quoted various texts, they are definitely meant for the worshipper who have attained Kulābhiṣeaka. According to 'सर्वोल्लासतन्त्र' there are two forms of Kaulāchāra i.e. Vāma and Dakṣina.

पशुभावयुताः कौलाः वैष्णवैष्णवशैवकाः ।
वीरभावयुताः कौलाः सिद्धान्तौ वामदक्षिणौ ।।

In the same way according to forms कालीक्रम and सुन्दरीक्रम of Śrīvidyā, there are—different method of Kula-Pūjana. Really the method of Vāma-Mārga is prohibited for Brahmaṇas following precepts and prohibitions of the Veda and the Smṛti. The excessive lust of the flowers in Middle age made it a subject of hatred. And, therefore, authoritative discussion has been put as regards the activities worth doing and otherwise in this book. These authorities also contain sayings of both kinds and therefore it depends on the teaching, teachers and descrimination of a worshipper.

In the beginning a Kaul worshipper uses hemp i.e. Bhanga. The author has not discussed the formailties of Kalaśa-Sthāpana etc. and according to 'प्राधान्येन व्यपदेशाः भवन्ति' has approved the use of hemp. The kinds, colour and method of refinement of hemp has been referred here. Then evidence from Tantras as regards Kul Nāyaka has been discussed in Dūti-Yāga. In Tantra texts the Dūtiyāga has been mentioned as a mean of union with Brahma :—

"आवश्यकं प्रवक्ष्यामि येन ब्रह्ममयो भवेत् ।
निर्विकल्पस्य देवेशि नान्यत् स सुखमीहते ।
सर्वशङ्काविनिर्मुक्तः सर्वज्ञः साधको भवेत् ।
दूतीयागविधिं कुर्यात् खेचरो जायते प्रिये ।।" (त्रिपुरा)

This Yāga is to be performed only by a conditioned performer because the worship of a naked beautiful woman is done in it, the male and female genital organs are worshipped and the Kuṇda Loṭak matter is collected. In such a worship

if one is deviated even a little, he may be ruined. And therefore one should be योगनिष्ठ and conditioned निर्विकल्प. The author has termed dūtī as Kul and describing the manner of her worship has also cleared the means of purification of Five Makar. The Mudrā, the deliverance from a curse and verses on meditation have also been included. A collection of Mantras one purification of matter has also been given. There is a reference to the fixation of Patra and the method of worship. The method of purification of Tantra is also explained.

The matter of the Pot is collected in it. Then there is the sacred injuction for oblation to Batuka, Yoginī, Kṣetra-Pāl Gaṇapati and all obstructing deties. Afterwards there is a short description of worship of one's desired deity, Guru-Tarpaṇa muttering of Mūla-Mantra, recitation of eulogy and acceptance of Prasād. There is mudrā-charvaṇa and enjoying of other materials.

The Author has described adequate worshipper and numerated twentyone such Patras according to Āgama-Sāra. Next he has described recitation of Śānti-Stotra and Patrādi Samwaraṇa with the method of Shānti-Yāga. Here also the worship of naked organs of Śākti, one's own sex-organ, oblation and the method of Visarjan is narrated in short, anotations from Tantras are also quoted.

Finally the Homa Mantras, Śukra Tyāga mantra, and the verses about their relation to Yoga are mentioned with Nairmalye-Dhāraṇa and Naivedya-grahaṇa.

This Kula-Pūjana-Chandrikā is a primary collection of methods for the worshippers of Kulāchāra system and it quotes related authorities also. The author must have been expert in this theory and for the benefit of his desciples he would have expounded this method in nut-shell. This subject is a top secret and is acquired from Gurus. And therefore those who want to go in details should study the elaborate Tantra Texts of this subject.

श्रीगणेशायनमः॥ नत्वागुरुपदद्वन्द्वंचंद्रशेखरशर्मणा॥ क्रियतेकौलिकप्रीत्यै
कुलपूजनचंद्रिका॥१॥ नन्वत्रकेषामधिकारइतिजिज्ञासायांकालीयामलेभैरवं
प्रतिदेवीवाक्यं॥ सर्वेषामधिकारोत्रनैवकार्य्योविचारणा॥ सत्यंसत्यंपुनःसत्यं
सत्यंसत्यंनसंशयः॥२॥ नचेद्ब्राह्मणेतरपरं॥ तथारुद्रयामले॥ वेदत्यागान्मद्य
पानाच्छूद्रभार्य्याप्रयोगतः॥ नलक्षणाज्जायतेवामोब्राह्मणोनात्रसंशयः॥३॥
जायतेब्राह्मण्याद्धीयते॥ इत्यर्थः॥ श्रीक्रमेपि॥ नदद्याद्ब्राह्मणेमद्यंमहादेव्यैक

॥ श्री ॥

श्रीचन्द्रशेखरविरचिता

कुलपूजनचन्द्रिका

●

॥ श्रीगणेशाय नमः ॥

नत्वा गुरुपदद्वन्द्वं चन्द्रशेखरशर्मणा ।
क्रियते कौलिकप्रीत्यै **कुलपूजनचन्द्रिका** ॥ १ ॥

नन्वत्र केषामधिकार इतिजिज्ञासायां **कालीयामले** भैरवं प्रति देवी-वाक्यम्—

सर्वेषामधिकारोऽत्र नात्र कार्या विचारणा ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न संशयः ॥ २ ॥

न चेद्ब्राह्मणेतरपरम् । तथा च **रुद्रयामले**—

वेदत्यागान्मद्यपानाच्छूद्रभार्याप्रयोगतः ।
तत्क्षणाज्जायते वामो ब्राह्मणो नात्र संशयः ॥ ३ ॥

जायते ब्राह्मण्याद् हीयते इत्यर्थः । **श्रीक्रमेऽपि**—

न दद्याद् ब्राह्मणो मद्यं महादेव्यै कदाचन ।

कालीपुराणे—

मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥ ४ ॥

इत्यादिवचनादिति वाच्यम् । सर्वपदस्य सङ्कोचनापत्तेर्योगिन्यादितन्त्र-विरोधाच्च ।

शूद्रो दद्यात् कृते मद्यं त्रेतायां वैश्य एव च ।
द्वापरे क्षत्रियो दद्यात् कलौ विप्रः सदैव हि ॥ ५ ॥

प्रतिदिनमित्यर्थः । **ब्रह्मयामले**—

जीवहीनो यथा देहः सर्वकर्मसु न क्षमः ।
मद्यहीना तु या पूजा ब्राह्मणानां विशेषतः ॥ ६ ॥

कुलार्णवेऽपि—

ब्राह्मणश्चेत् कुलज्ञानी स शिवो नात्र संशयः ।
श्वपचोऽपि कुलज्ञानी ब्राह्मणादतिरिच्यते ॥ ७ ॥
मद्यं मांसं विना यस्तु कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥ ८ ॥
अत एव सदा प्राज्ञः पञ्चतत्वेनैव पूजयेत् ।

आगमकल्पद्रुमेऽपि—

ब्राह्मणो मदिरां दद्यात् कलौ विधिविधानतः ॥ ९ ॥

श्रीक्रमेऽपि। अत्र कल्पविधानमप्यस्ति—

ब्राह्मणस्ताम्रपात्रे च मधु मद्यं प्रकल्पयेत्।
अथवा ताम्रपात्रे च गव्यं दद्यात् घृतं विना ॥१०॥
नारिकेलोदकं कांश्ये गुडार्द्रकं तथैव च।

मुख्येऽधिकाराभावस्तदानुकल्पमपि निरर्थकं स्यादतो ब्राह्मणस्य कुलपूजायामधिकारोऽस्त्येवेति निश्चितम्। ननु दानेऽधिकारोऽस्तु न पाने 'वेदत्यागान्मद्यपानात्' इत्यादि पूर्वोक्तवचनाच्च।

सौत्रामण्यां कुलाचारे ब्राह्मणोऽपि पिबेत् सुराम्।
अन्यत्र कामतः पीत्वा प्रायश्चित्ती युगे हि सः॥

कौलतन्त्रे—

पीत्वा विना तीर्थरसं रसायनं गत्वा विना चारु रजोमयं कुलम्।
भुक्त्वा विना चारु सुपक्वमामिषं यः पूजयेत् त्वां स भवेदव्याश्रयः (?) ॥

अथर्वणश्रुतौ—

स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः।
स तीर्थसेवी तीर्थेषु स यज्वा सर्वमन्युषु॥

यः पञ्चभिर्मकारैः कुलाचारविधिना देवीमिष्ट्वा गुर्वादिभ्यः स्तुत्वा तत्पात्रमर्पयित्वा शेषं कुण्डलिनीमुखे हुतेत्। **वीरतन्त्रे—**

पीत्वा मद्यं जपित्वैना-मीशानत्वं-भवेद् ध्रुवम्।
तत्रैव लयमाप्नोति न पुनर्जन्यते भुवि॥

आचारसारे—

पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते॥'

कालिका-कुल-सर्वस्वे—

देव्यै निवेदितं यद्यत् तत्सर्वं भक्षयेन्नरः।
दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत्॥

इत्यादिवचनात्। ननु कस्मिन् विषयेऽस्योपयोगित्वम्? किं शक्तिविषये? किं विष्णुविषये? किं सर्वत्रैव? तदुक्तम्

कालीपुराणचीनाचारयोः—

महाभैरवकायोऽयं शिवस्य वामनायकः।
अयं तु वामभावेन पूज्यो मर्त्यादिभिः सदा ॥ १ ॥
विष्णोश्च वामिकामूर्तिर्नरसिंहक्रियो भवेत्।
तथैव बालगोपालकथितो वामनायकः ॥ २ ॥
मद्यमांसाशनो भोगी लोलुपः स्त्रीषु सर्वदा।

रत्यास्तु चण्डिकादेव्या वामिका मूर्तिरीरिता ॥ ३ ॥
लक्ष्म्यास्तु वामिकामूर्तिरुक्ता दहनभैरवी ।
महालक्ष्मी पूजितव्या वामभावेन सर्वदा ॥ ४ ॥
वाग्भैरवी सरस्वत्याः वामिकामूर्तिरीरिता ।
मार्तण्डभैरवो नाम मूर्तिः सूर्यस्य कीर्तिता ॥ ५ ॥
गणेशस्याग्निवेतालः कथितो वामनायकः ।
तारिणी दक्षिणा देवी सुन्दरो भैरवी तथा ॥ ६ ॥
महाचीनक्रमाचारैः सिद्ध्यन्ते नात्र संशयः ।
सुन्दरी भैरवीदेव्याः प्रकारोऽन्योऽपि विद्यते ॥ ७ ॥
तारणी दक्षिणा सिद्धिर्नैव चीनक्रमं विना ।
स धन्यः स च विज्ञानी सः कविः स च पण्डितः ॥ ८ ॥
सः कुलीनः सः सुकृती सरसी स च साधकः ।
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ॥ ९ ॥
स तीर्थसेवी तीर्थेषु स संन्यासी स सर्वदः ।
स वृती सोमयाजी सः स यज्वा सर्वमन्युषु ॥१०॥
स वैष्णवः स शेवः स्यात् सः सौरः स च गाणपः ।
महाचीनक्रमाचारैर्यो यजेत् तारिणीं नरः ॥११॥

अथ दूतीयागः । तत्रादौ विजयास्वीकारः ।

संविदासवयोर्मध्ये संविदेव गरीयसी ।
संवित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः ॥ १ ॥

सा चतुर्धा— श्वेतपुष्पा ब्राह्मणी स्यात् क्षत्रिया रक्तपुष्पिका ।
पीतपुष्पा च वैश्या स्यात् शूद्रा तु कृष्णपुष्पिका ॥ २ ॥
आहृत्य पत्राण्येतासां तत्तन्मन्त्रेण शोधयेत् ।

मन्त्रा यथा—

ओं संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे । भैरवाणां च वृत्यर्थं पवित्रा भव सर्वदा ॥ ओं ब्राह्मण्यै नमः स्वाहा । इति ब्राह्मणीशोधने मनुः [मन्त्रः] । सिद्धमूलकरे देवी हीनबोधप्रबोधिनि । राजाप्रजावशंकरि शत्रुकण्ठत्रिशूलिनी ॥ ह्रीं क्षत्रियायै स्वाहा । शोधयेदपरां ततः । अज्ञानेन्धनदीप्ताग्नौ ज्ञानाग्ने सर्वतोमुखि । आनन्दस्याहुति प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ॥

क्लीं वैश्यायै नमः स्वाहा । शूद्रां शोधयेत् ततः ।

नमःस्यामि नमःस्यामि योगमार्गप्रदर्शिनि ।
त्रैलोक्यविजये मातः समाधिफलदा भव ॥

सौः शूद्रायै नमः स्वाहा। शूद्रासंशोधने मन्त्रः। ओऽम् अमृते अमृतोद्भवे अमृतवर्षिणि ततो अमृतमाकर्षयेति च। सिद्धिं देहि अमुकं मे वशमानपटद्वयम्। अनेन म ठ ना देवि त्रिवारमभिमन्त्रयेत्।

उत्तरतन्त्रे—

मूलमन्त्रं सप्तवारं तस्योपरि जपेत् सुधीः।
आवाहनादिमुद्रां च धेनुयोनिं ततः परम्॥ १॥
दिग्बन्धश्छोटिकाभिश्च तालत्रयपुरःसरम्।
दिव्यदृष्ट्या पार्ष्णिघातैर्विघ्नानभिघातयेत्॥ २॥
गुरून् पद्मसहस्रारैः त्रिवारं तत्त्वमुद्रया।
हृदि देवीं तु सन्तर्प्य स्वीकुर्याद् विजयां सुधीः॥ ३॥
वाग्भवं पूर्वमुद्धृत्य वद वद ततः परम्।
वाग्वादिनि ततः प्रोच्य मम जिह्वाग्रे स्थिरा भव॥ ४॥
सर्वसत्त्ववशं प्रोच्यकरि स्वाहेति चोच्चरेत्।
अनेन मन्त्रनामंत्री स्वीकुर्याद् विजयां सुधीः॥ ५॥
ततो रात्रिप्रहरे ताम्बूलपूरितमुखः कुलनायकां पूजयेत्।

तदुक्तमुत्तरतन्त्रे—

याममात्रगते रात्रौ कुलगेहगतः पुमान्।
ताम्बूलपूरितमुखो धूपामोदसुगन्धितः॥ १॥
बहुचन्दनलिप्ताङ्गो बहुकाल्येन भूषितः
पञ्चीकरणसङ्केतैः पूजयेत् कुलनायिकाम्॥

कुलनायिका यथा—

नटी कापालिकी वेश्या रजकी नापिती तथा।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका॥ १॥
एतासां काचिदानीय पूजयेत् साधकोत्तमः।
तासामभावे अन्याश्च या काचिदपि कन्यका॥ २॥
विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गना।
गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिता॥ ३॥
संगोपनरताप्ता या तरुणी सर्वसिद्धिदा।
सर्वानुष्ठाननिरता सात्त्विकी भक्तिसंयुता॥ ४॥
चातुर्यौदार्यदाक्षिण्यकरुणादिगुणान्विता।
रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी॥ ५॥
सदा परिगृहीतां वा शुकां सङ्केतमागताम्।
अथवा तत्क्षणायातां मदनालस (नल) तापिताम्॥ ६॥

विलिप्तां रक्तगन्धेन रक्ताम्बरविभूषिताम् ।
एवं भूतां यजेत् तां च प्रसूनतूलिकोपरि ॥ ७ ॥
अर्थाद् वा कामतो वापि स्ववशां तां तु कारयेत् ।

ऐवंविधां कुलमानीय उद्वर्तनादिकं विधाय सुगन्धधूपादिभिः केशान् संशोध्य नानालङ्कारवासोभिः विभूषयित्वा तूलिकोपरि नियोजयेत् । तदुक्तम्— (आनीय) हि कुलं सम्यगुद्वर्तनमतः परम् ।
स्नानं शुद्धदूकूलादि त्वनुलेपनशोभितम् ॥ १ ॥
स्वलंकृतं गतः श्रान्तिः स्वागताचमनं तथा ।
निवेश्य तूलिकामध्ये नानापुष्पसुगन्धिना ॥ २ ॥
चन्दनागरुकर्पूरकस्तूरीकुङ्कमादिभिः ।
समाकोर्णो निवेश्याथ पूजयेत् कुलनायिकाम् ॥ ३ ॥

ततो भूतशुद्ध्यादिकं विधाय कुलाङ्गेऽपि न्यसेत् । यथा—
अङ्गन्यासकरन्यासौ प्राणायामस्ततः परम् ।
विधाय मातृकान्यासं कुलाङ्गेऽपि निवेशयेत् ॥

तत्र पञ्चमकारस्यावश्यकत्वात् पञ्चमकारमानीय शोधयेत् । तद्यथा **भैरवतन्त्र-वामकेश्वरतन्त्र-महाभैरवतन्त्रेषु—**

मद्यं मासं तथा मत्स्यं मुद्रा मैथुनमेव च ।
विना पञ्चोपचारेण देवीपूजां करोति यः ॥ १ ॥
योगिनीनां भवेद् भक्ष्यः पापं चैव पदे पदे ।
एतत्पञ्च विजानीयात् पञ्चदेवस्वरूपकम् ॥ २ ॥
ब्रह्मा मद्यं हरिर्मांसं मत्स्यरूपी महेश्वरः ।
मुद्रा च ईश्वरो ज्ञेयो मैथुनं शिव उच्यते ॥ ३ ॥

प्रथमा शुद्धिर्यथा स्ववामे त्रिकोणं तद्बाह्ये षट्कोणं तद्बाह्ये चतुरस्रं विलिख्य तदुपरि घटं संस्थाप्य मूलेनावलोक्य पञ्चमुद्राभिः प्रणमेत् । तदुक्तं **त्रिदशडामरे—**

त्रिकोणं वामभागे च षट्कोणं तद्बहिर्भवेत् ।
वृत्तं च तद्बहिर्न्यस्य चतुरस्रं समालिखेत् ॥ १ ॥
ततश्च कारणं द्विव्यं समानीय घटस्थितम् ।
वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भूषितम् ॥ २ ॥
तत्र संस्थापयेद्भक्त्या देवीबुद्ध्या च साधकः ।
विलोकयेत् ततो द्रव्यं मूलं मन्त्रे परामृशन् ॥ ३ ॥

प्रणमेद् भक्तिभावेन मुद्राभिः पञ्चभिः पराम् ।
द्रां नमश्चतुरस्रं स्याद् ह्रीं नमः सम्पुटाकृतिः ॥ ४ ॥
क्लीं नमः संवृतं ज्ञेयं ब्लूं नमः सम्पुटाञ्जलिः ।
सः नमो योनिमुद्रा च पञ्चमुद्राः प्रकीर्तिताः ॥ ५ ॥

भूमौ करतलद्वयं सरलाकारेण निधाय प्रणमेदिति चतुरस्रमुद्रा । १ । पुटाकारकरयुगं मुष्टिवत् भूमौ निधाय प्रणमेदिति संवृता मुद्रा । २ । पुटांजलिना करयुगं भूमौ कृत्वा प्रणमेदिति सम्पुटमुद्रा । ३ । पुटांजलिकरयुगे कनिष्ठयोर्मूले वृद्धाद्वयं निक्षिप्य प्रणमेदिति पुटाञ्जलिमुद्रा । ४ । योनिमुद्रा च । ५ ।

ततः शापमोचनं कुर्यात् । यथा **कुमारीतन्त्रे**--

अन्यच्च श्रृणु देवेशि यथा पानादिकर्मणि ।
न दोषो जायते देवि तान् वै मन्त्रान् श्रृणुष्व मे ॥ १ ॥
एकमेवापरं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ २ ॥
सूर्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमाबीजमये देवि शुक्रशापं विमोचय ॥ ३ ॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन देवेशि ब्रह्महत्यां व्यपोहतु ॥ ४ ॥

इति मन्त्रत्रयं देविघटं धृत्वा त्रिधा पठेत् ।

वेदादिब्रह्मबीजं च षट्दीर्घयुक्तं समुच्चरेत् ।
ब्रह्मशाप इति प्रोच्य विमोचिता चङेयुता ॥ १ ॥
सुधादेव्यै नम इति ब्रह्मशापं विमोचयेत् ।
इमं मन्त्रं त्रिः पठित्वा कृष्णशापं विमोचयेत् ॥ २ ॥
मायाबीजं समुद्धृत्य स्वं बीजं तदनन्तरम् ।
षट्दीर्घयुक्तं मायाख्यं कृष्णशापं ततो वदेत् ॥ ३ ॥
विमोचय पदं प्रोच्य अमृतं श्रावयेति च ।
वह्निजायावधिर्मन्त्रः कृष्णशापविमोचने ॥ ४ ॥
त्रिधाऽभिमन्त्रयेद् द्रव्यं हंससूचिसदित्यृचा ।

मन्त्रो यथा—ओं हंसः शुचिषदित्यृचा

ओं हँ सः सुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषहरसदृतसद्व्योमसदब्जा गोजा ऋतजा ऋतं बृहत् । (यजु० १०।२४)

उत्तरतन्त्रे—आनन्दभैरवाध्याये द्रव्यमध्ये ततः प्रिये ।
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसमप्रभम् ॥
अष्टादशभुजैर्युक्तं पञ्चवक्त्रं त्रिलोचनम् ।
अमृतार्णवमध्यस्थं ब्रह्म पद्मोपरिस्थितम् ॥ २ ॥

वृषारूढं नीलकण्ठं सर्वालङ्कारविभूषितम् ।
कपालखट्वाङ्धरं घण्टाडमरुवादिनम् ॥ ३ ॥

पाशाङ्कुशधरं देवं गदामुशलधारिणम् ।
खड्ग-खेटक-पट्टीस-मुद्गर-शूलधारिणम् ॥ ४ ॥
रक्तकुम्भधरं देवं मुण्डस्फोटकधारिणम् ।
स्फोटमुद्गरहस्तं च वरदाभयविग्रहम् ॥ ५ ॥

लोहितं देवदेवेशं भावयेत् कुलनायकः ।

एवं ध्यात्वा आनन्दगायत्रीं जपेत् । ऐं ह्रीं श्रीं आनन्दभैरवाय विद्महे सुधादेव्यै धीमहि तन्नोऽर्धनारीश्वरः प्रचोदयात् । इति प्रजप्य । हसक्षमलवरयूँ आनन्दभैरवाय वौषट् इतिमन्त्रेण आनन्दभैरवं त्रिः सम्पूज्य आनन्दभैरवीं ध्यायेत् । यथा -

उद्यत्सुधाम्बुनिधिमध्यसुवर्णशैले
नीपादिवृक्षवनमध्यसुवर्णभूमौ ।
भास्वद्विचित्रमणिमण्डपरत्नद्वीप-
पीठस्थितां भुवनमातरमाश्रयामि ॥ १ ॥

सच्चिन्मयीं तरुणभानुसहस्रकान्ति
पाशाङ्कुशप्रणवकार्मुकपञ्चबाणान् ।
ध्यायेत् त्रिलोकजननीं स्वकरे दधानां
पद्मं विचित्रकरभूषणभूषिताङ्गीम् ॥ २ ॥

क्षीरोदामृतमातृभिः क्षणपरां जातां परां कन्यकां
बिभ्राणां नरभिश्च दक्षिणकरैर्विज्ञानसूत्रं पराम् ।
मांसं मुद्गरमद्यखर्परशिलां रक्तां च मुष्टिं वरां
वामे कुञ्जरदन्तकण्डमरुकं क्षीरोदनं चक्रकम् ॥ ३ ॥

दक्षे चाभयपाशकार्मुकशिलानावं च मुंडं परं
ध्यायेन्माहिषशृङ्गकापिलजटां घोरां च घण्टां सुराम् ।
रौद्री सा दधती भुजैरभिनवप्राप्त्यै सुधा जायतां
नानावाग्भवकामादा त्रिनयना श्रीकालिकामूर्तिका ॥ ४ ॥

इति ध्यात्वा हसक्षमलवरयीं आनन्दभैरव्यै वषट्, इति सम्पूज्य। एभिर्मन्त्रैः शुद्धिं कुर्यात्। यथा—ऐं ह्रीं अमृतकुण्डलिनि अमृतं कुरु कुरु स्वाहा। ओं हसक्षमलवायूँ आनन्दभैरवाय कुम्भं पूरय पूरय। ओं हसक्षमलवायीं आनन्दभैरव्यै मुद्रादेवी पवित्री कुरु कुरु स्वाहा। ओं व्लाँ व्लीं व्लूँ विकारि काशिनि अस्य द्रव्यस्य विकारान् हर हर स्वाहा। ह्रीं श्रीं नमो भगवति वामकेश्वरि वासनापानमूर्च्छनि आबिन्दुग्रासिनि महालक्ष्मीश्वरि सुभगे द्रव्यं गृहाण गृहाण स्वाहा। ह्रीं श्रीं पशुपाशाय हूँ फट्। द्रीं श्रीं पशुपाशं विमोचय विमोचय विमोचिकायै स्वाहा। ऐं ग्लौं तिरस्करिणि सकलजनवाग्वादिनि सकलपशुजनवाक्त्वक्चक्षुःश्रोत्रघ्राणप्राणतिरस्करणं कुरु कुरु ह्रीं फट् स्वाहा।

एतेषां मन्त्राणामुद्धारो विस्तरभयान्नो लिखितः। ततो द्रव्यमध्ये शक्तिचक्रं लिखेत्। यथा त्रिपङ्क्त्या दक्षिणावर्तेन अकथादित्रिरेखया विलिख्य मध्ये हं लं क्षं लिखेत्। ततः शिवशक्त्योः समावेशाद् द्रव्यमध्ये अमृतत्वं विचिन्त्य धेनुमुद्रयाऽमृतीकरणं कृत्वा वरुणबीजं मूलमन्त्रमप्यष्टधा घटं धृत्वा पठेदिति द्रव्यशुद्धिः।

त्वदुक्तं स्वतन्त्रे—

ततो वै विलिखेद् द्रव्यमध्ये द्रव्यनिभं प्रिये।
अकथादित्रिपङ्क्त्या च हं लं क्षं मध्यमण्डितम्॥ १॥
तत्र सञ्चिन्तयेद् देवि शिवशक्त्योः समागमम्।
अमृतं चिन्तयेद् द्रव्यमष्टधा वारुणं जपेत्॥
अष्टधा मूलमन्त्रं च जपेद् धृत्वा घटं ततः।
एतत्तु कारणं देवि सुरसंह(संघ)निषेवितम्।
अत एव तस्य नाम सुरेति भुवनत्रये।

अथ मांसमत्स्यादिभेदाः। तदुक्तं **यामले—**

मांसं तु त्रिविधं देवि जलभूचरखेचरम्।
गोना[१]विभास्वमहिषवराहाजमृगोद्भवम् ॥
महामांसाष्टकं प्रोक्तं देवताप्रीतिदायकम्।

मांसाभावेऽनुकल्पं यथा **समयाचारे—**

लवणार्द्रकपिण्याके गोधूमं मांसपञ्चकम्।
लशुनं च महादेवि मांसप्रतिनिधौ स्मृतम्॥ १॥
मत्स्यं च त्रिविधं देवि उत्तमाधममध्यमम्।
उत्तमं त्रिविधं प्रोक्तं शालपाठीनरोहितैः॥ २॥

---

१. गोना = गयगा नीलगाह। महामांसं = मानुषं मासम्।

प्रवीणं कण्टकैर्हीनं तैलाक्तं स्वादुसंयुतम् ।
देव्याः प्रीतिकरं चैव मध्यमं तच्चतुर्विधम् ।। ३ ।।
क्षुद्राणि तानि सर्वाणि अधमान्याहुरुत्तमाः ।

मीनाभावेऽनुकल्पं यथा—

मीनाभावे तु कूष्माण्डं स्वदग्ध्यं स्वपरिष्कृतम् ।
जम्बीरं रक्तशाकं च स्वपक्वं विनिवेदयेत् ।। १ ।।

मुद्रा तु त्रिविधा । यथा **ज्ञानार्णवे—**

घ्रेहेयं कण्डलाकारं चन्द्रबिम्बनिभं शुभम् ।
चारुपक्वं मनोहारि शर्कराद्यैः प्रपूरितम् ।
पूजाकाले देवताया मुद्रैषा परिकीर्तिता ।

यामले—

भ्रष्टधान्यादिकं यद्यच्चर्वणीयं प्रकल्पयेत् ।
तेषां मुद्रा कृता संज्ञा महामोदप्रवर्द्धिनी ।।

अथ मांसशोधनम् । **ताराकल्पे—**

ओं प्रतद्विष्णुस्स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि व्विश्वा ।। १ ।।

अथ मीनशुद्धिः । यथा—ओं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।। (यजु०)

अथ मुद्राशुद्धिः । यथा—ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चतुराततम् । ॐ । तद्विप्रासो विपन्ययो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदम् ।। (यजु० ६।५ तथा ३४ । ४४)

ॐ । त्रीणि पदानि विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् । (यजु० ३४।४३)

अथ कुण्डगोलोद्भवशुद्धिः । ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।। गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विना देवा वाधत्तां पुष्करस्रजौ ।।

ऐं प्लं व्लं प्लं प्लूं स्वाहा । अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं श्रावय श्रावय स्वाहा ।

अनेनैव त्रिरावृत्या पुष्पशुद्धिं च कारयेत् ।

अथैषां फलान्याह **ताराकल्पे—**

द्वितीयां प्रथमायुक्तां यो दद्यात् कुलयोगिने।
तृप्यन्ति मातरः सर्वा योगिन्यो भैरवादयः॥ १॥
पृथिवीं हेमपूर्णां च दत्वा यत्फलमाप्नुयात्।
तत्फलं कौलिके दत्वा तृतीयां प्रथमायुताम्॥ २॥
अश्वमेधादिकं पुण्यमनुदानादहर्निशम्।
तत्फलं लभते देवि कौलिके शक्तियोगतः॥ ३॥

इत्यादि। अत्र स्थापनक्रमः घटसमीपे त्रिकोणावृतचतुरस्रं विलिख्य तत्र नम इति प्रक्षालितं श्रीपात्रं योगिनीपात्रं वीरपात्रं बलिपात्रं यथाक्रमेण स्थापयेत्। ततः स्वकल्पोक्तक्रमेणार्घ्यस्थापनपात्रं स्थापयित्वा तदुपरि जपेत्।

ब्रह्माणुरससम्भूतमशेषरससम्भवम्।
आपूरितं महापात्रं पीयूषरसमावह॥ १॥
ओं। अखण्डैकरसानन्दकलेवरसुधात्मनि।
स्वच्छुदस्फुरणादत्र निधेह्य कुलरूपिणि॥ २॥
ओं अकुलस्थामृताकारे शुद्धिज्ञानकलेवरे।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि॥ ३॥
ओं तद्रूपेणैकरस्यं च कृत्वा चैतत् स्वरूपिणि।
भूत्वा परामृताकारं मयि चित्तस्फुरणं कुरु॥ ४॥

इति अर्घ्यस्थापनं कृत्वा तत्त्वशुद्धिं कुर्याद्। यथा—कारणेन दक्षहस्ततलं सम्मार्ज्य त्रिकोणं विलिख्य निलमुद्गसदृशीं शुद्धिं त्रिकोणाद् दक्षोत्तरसन्मुखमध्येषु निधाय वामहस्ताङ्गुष्ठमध्यमानामायोगेनैकां गृहीत्वा मूलमन्त्रान्ते ह्रीं श्रीं श्रों आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा। अनेनाधःशुद्धिं स्वीकृत्य ह्रीं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा। अनेन दक्षिणस्थां स्वीकृत्य ह्रीं श्रीं शिवतत्त्वेन परदेहं शोधयामि स्वाहा। इत्युत्तरस्थां स्वीकृत्य ह्रीं श्रीं सर्वतत्त्वं शोधयामि स्वाहा। अनेन मध्यमायां वामदक्षहस्ताभ्यां स्वीकृत्य हस्तेन हस्तं विशोध्य हस्ताभ्यां सर्वाङ्गं मार्जयेदिति तत्त्वशुद्धिः। ततः श्रीपात्रामृतेनात्मानं पूजोपकरणानि चाभ्युक्ष्व चक्रस्य पूर्वं दक्षिणपश्चिमोत्तरेषु त्रिकोणावृतभूबिम्बं विलिख्य ह्रीं ह्रूँ मण्डलाय नमः इति मण्डलान् सम्पूज्य तत्र मत्स्यमांसादिभिर्बलिमुपस्कृत्य पूर्वे बं बटुकाय नमः इति सम्पूज्य बलिपात्रामृतेन वामाङ्गुष्ठानामिकाभ्यामुत्सृजेदेतेन ओं एह्येहि देवीपुत्रबटुकनाथकपिलजटाभारभासुर त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा।

एष बलिर्बटुकाय नमः दक्षिणेयां योगिनीभ्यो नमः। इति सम्पूज्य पूर्ववद्बलिं दद्यादनेन।

योगिन्यः कामरूपाः सकलगुणयुतास्तप्तकार्तस्वराभा
मत्ताः कङ्कालमालाः कलितमलतरा रक्तवस्त्रोत्तरीयाः।
लिङ्गं पाशं कपालं सृणिमपि दधतीः सुस्मिताः सुप्रसन्नाः
भक्तानां साधकानामभिलषितफलं दीयमानाः सुवेद्याः॥ १॥

ह्रीं यां योगिनीभ्यो नमः स्वाहा। सर्वयोगिनी हूँ फट् स्वाहा एष बलियोगिनीभ्यो नमः। पश्चिमे क्षं क्षेत्रपालाय नमः।

इति सम्पूज्य पूर्ववद् बलिं दद्यादनेन—

शूलं डमरुकं चैव कपालं खड्गमेव च।
दधानं कृष्णवर्णं तं भजेऽहं क्षेत्रनायकम्॥ १॥

क्षां क्षीं क्षूँ क्षौं क्षः स्थानक्षेत्रपाल धूपदीपसहितं बलिं गृह्ण गृह्ण स्वाहा। एष बलिः क्षेत्रपालाय नमः। उत्तरे गं गणेशाय नमः। इति सम्पूज्य बलिं दद्यादनेन—

वामनं कृष्णवर्णं च सर्वाभरणभूषितम्।
पाशाङ्कुशकपालांश्च त्रिशिखं बिभ्रते नमः॥ १॥

गां गीं गूं गैं गौं गः गणपतये वर वरद सर्वजनं मे वशमानय। बलिं गृह्ण गृह्ण स्वाहा। एष बलिर्गणेशाय नमः। ततः स्ववामे त्रिकोणबिम्बं भूबिम्बं विलिख्य ऐं ह्रीं व्यापकमण्डलाय नमः, इति सम्पूज्य तत्र साधारं बलिं संस्थाप्य भूतान् सम्पूज्य बलिं दद्यादनेन ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो नमः इति दद्यात्। ततः स्वकल्पोक्तविधिना इष्टदेवतां सम्पूज्य ब्रह्मरन्ध्रे गुर्वादीन् आनन्दभैरवमानन्दभैरवीं च सन्तर्प्य हृदि देवीं सन्तर्पयित्वा यथाशक्ति मूलमन्त्रं जप्त्वा समर्प्य हृदि देवीं तर्पयित्वा यथाशक्ति जप्त्वा समर्प्य स्तुत्वा प्रणम्य साधकैः सह प्रसादग्रहणं कुर्यात्। सामयिकोऽपि चक्रे गत्वा पूर्वोक्तमुद्राभिर्देवीं प्रणम्य चक्राकारेण पङ्क्त्याकारेण वा भिन्नभिन्नासने शक्तियुक्तश्चेत् तदा युग्मयुग्मक्रमेणोपविशेत्। चक्रेश्वरश्च तान् शिवशक्तिधिया पूजयेत्। तदुक्तं **रुद्रयामले—**

स्वकल्पोक्तविधानेन पूजयेत् स्वेष्टदेवताम्।
सम्पूज्य विधिवद् देवीं तर्पयेन्न गुरून् स्वकान्॥ १॥
भैरवं भैरवीं चापि तर्पयेद् यतमानसः।
ततः स्वहृदये देवीं तर्पयित्वा जपं चरेत्॥ २॥
तेजोमयं जपं देव्याः वामहस्ते समर्पयेत्।
'ओंगुह्यातिगुह्यगोप्त्री त्वम्' इति मन्त्रेण मन्त्रवित्॥ ३॥

ततः शिरसि पुष्पं वै दत्वाष्टाङ्गं प्रणम्य च।
आहूय साधकान् देवि प्रसादग्रहणं चरेत् ॥ ४ ॥

साधकोऽपि समागत्य प्रणम्य भक्तिभावतः।
निवसेत् चक्ररूपेण पङ्क्त्याकारेण वा यथा ॥ ५ ॥

शक्तियुक्तो यदि भवेद् युग्मयुग्मविधानतः।
ततश्चक्रेश्वरो देवि दत्वा चन्दनपुष्पकम् ॥ ६ ॥

शिवशक्तिधिया सर्वान् चक्रमध्ये समर्चयेत्।
यथाविभवरूपेण पंचतत्त्वं निवेदयेत् ॥ ७ ॥

तदा तुष्टा भवेद् देवी सर्वान् कामान् लभेदपि।
अन्यथा नैव सिद्धिः स्यात् क्रुद्धा भवति योगिनी ॥ ८ ॥

मेदिनीं यस्तु सम्पूर्णां ब्राह्मणे वेदपारगे।
दत्वा यत् फलमाप्नोति तत्फलं कौलिकार्चनात् ॥ ९ ॥

वापीकूपतडागादि दत्वा यत् फलमाप्नुयात्।
तत्फलं कोटिगुणितं कौलिकानां प्रपूजने ॥ १० ॥

कौलिकं निन्दयेद् यस्तु कुलशास्त्रपरायणम्।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥ ११ ॥

अथ तत्र गुरोरागमनं भवति तदा उत्थाय भक्तिपूर्वकं वन्दनं कृत्वा गन्धपुष्पादिना सम्पूज्य तत्पात्रं शुद्धिसहितं तस्मै दत्वा प्रणमेत्। यदि तत्र गुरुर्न भवेत् तर्हि तत्पात्रं जले क्षिपेत्। तदुक्तं **भावचूडामणौ**--

यदि स्यादेव योगेन गुरोस्तत्र समागमः।
उत्थाय वन्दनं कृत्वा तस्य श्रीपादुकां स्मरन् ॥ १ ॥

आदौ सम्पूजयेद् भक्त्या गन्धपुष्पाक्षतादिभिः।
शुद्धियुक्तं तु तत्पात्रं निवेद्य प्रणमेद् बुधः ॥ २ ॥

साक्षाद् यदि गुरुर्न स्यात् तदा तोये विसर्जयेत्।

ततः पाणिभ्याम्—

अलिपात्रमिदं (?) तुभ्यं दीयते पिशितान्वितम्।
त्वत्प्रीत्यै सुभगे देवि जपं देहि रिपुं दह ॥

ज्येष्ठानुक्रमेण वीरपात्रं शुद्धियुक्तं तेभ्यो दत्वा शिवशक्तिधिया प्रणमेत्। ततः सामयिकौ भक्त्या पाणिभ्यां पात्रमादाय चक्रेश्वरं नत्वा आधारोपरि पात्रं निधाय वमिति धेनुमुद्रयाऽमृतीकृत्य तदुपरि मूलमष्टधा जप्त्वा पूर्ववद्

गुर्वादि आनन्दभैरवम् आनन्दभैरवीमिष्टदेवतां च सन्तर्प्य तत्त्वशुद्धिं पूर्ववत् कृत्वा ज्येष्ठानुक्रमेणान्योऽन्यं प्रणम्य आधारान् पात्रमुधृत्य दक्षे शुद्धिं गृहीत्वा सुधादेवीं ध्यात्वा चक्रेश्वरेण सह पात्रवन्दनं कुर्यात् । तदुक्तं **स्वतन्त्रे**—

पाणिभ्यां विधिवद् भक्त्या शक्तौ पात्रं निवेदयेत् ।
ज्येष्ठानुक्रमतो दद्याद् वीरपात्रं कुलेश्वरि ॥ १ ॥
शुक्रादिरहितं पात्रं नार्पयेत् तु कदाचन ।
एकेन पाणिना वापि कदाचिन्नार्पयेद् बुधः ॥ २ ॥
ततः सामयिकः पात्रं पाणिभ्यामाहरेत् ततः ।
नमस्कृत्य यथान्यायमन्यथा नरकं व्रजेत् ॥ ३ ॥
आधारोपरि संस्थाप्य ततोऽमृतं प्रकल्पयेत् ।
तस्योपरि जपेन्मूलमष्टधा साधकोत्तमः ॥ ४ ॥
सहस्रारे महापद्मे गुरूनानन्दभैरवान् ।
देवीं चापि तर्पयित्वा तप्वशुद्धिं समाचरेत् ॥ ५ ॥
विधिवद् वन्दयेत् पात्रं ततोऽन्योऽन्यं नमश्चरेत् ।
दक्षशुद्ध्यादिकं कृत्वा सव्येन पानमाचरेत् ॥ ६ ॥
हस्ते पात्रं गृहीत्वा तु सुधादेवीं विभावयेत् ।
समुद्रे मथ्यमाने तु क्षीराब्धौ सागरोत्तमे ॥ ७ ॥

तत्रोत्पन्नां सुधादेवीम् इत्यादिना ध्यात्वा श्रीमद्भैरवशेखरेत्यादिना वन्दनं कृत्वा गृह्णामीत्युक्त्वा गुरुशक्तिसाधकाज्ञां गृहीत्वा तेऽपि जुषस्वेति ब्रूयुः । ततो मूलाधारात् कुण्डलीमाजिह्वान्तं विभाव्य श्रीगुरुपादुकां स्मरन् ज्येष्ठानुक्रमेण परामृतं कुण्डलीमुखे समर्पयेत् । **तदुक्तमुत्तरतन्त्रे**—

अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।
जुषस्वेति अनुज्ञातो गुरुणा वा कुलीनकैः ॥
गृह्णीयाच्च स्वयं सिद्धो बद्धपद्मासनः सुधीः ।

उदयाकरपद्धत्याम्—

कृत्वा मन्त्रतनुं स्मरेद् गुरुपदं देवीं परां चिन्मयीं
पश्चात् पात्रवरं पलाशविधृतं दीपैर्युतैः चोज्ज्वलैः ।

पुष्पादिष्वभिमन्त्रितं च निविडं सम्मोहनं वासवं
ये सञ्चिन्त्य पिबन्ति यान्ति खलु ते भुक्तिञ्च मुक्तिं पराम् ॥

एवं विभाव्य जुहुयादनया ऋचा —

ओं हिरण्यपात्रं मधोः पूर्णं मधव्योषाणि एकधा ब्रह्मणा उपहरन्ति आयुस्ते ददाति जुहोमि परवानन्दहेतवे । ब्रह्मसाधकानां मायानन्दिनि त्वं सुधा भव । तर्पयेत् परदवीं तु स्ववक्त्रे साधकैः सह । मुद्रां तु चर्वयेत् पश्चात् महामोदप्रवर्द्धिनीम् । ततः पुनः पात्रं गृहीत्वा हैममित्यादिना वन्दनं कुर्यात् । सर्वाम्नायेत्यादिना तृतीयपात्रवन्दनम् । मद्यं मांसमित्यादिना चतुर्थपात्रवन्दनम् । मूलमुच्चरन् मूर्ध्नि श्रीगुरुपादुकां ध्यायन् यावद् दृष्ट्यादिकं न चलति तावत् पानं कुर्वीतेति नियमः । तदुक्तं **कुलचूडामणौ**—

यावन्न चलते दृष्टिर्यावन्न चलते मनः ।
तावत् पानं प्रकुर्वीत पशुपानमतः परम् ॥

पात्रप्रमाणं **कुलार्णवे**—

नयना (२) ग्नि (३) बाण (५) संख्या कार्यं तु परमेश्वरि ।
हेतुपात्रं प्रकर्तव्यमित्युक्तं भैरवैः स्वयम् ॥
इतोऽप्यधिकपात्रं तु न कर्तव्यञ्च साधकैः ।
कृते च सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका ॥

द्रव्यं बाण (५) गुणा (३) क्षि (२) तोलकमितं कृत्वा कराम्भोरुहे इत्यादि **पूर्णानन्दस्वामि**पादैरप्युक्तम् । केषाञ्चिन्मते **आगमसारोक्त**तरुणोल्लासैकविंशतिमात्रैरेकविंशतिसंख्याकपात्रं कर्तव्यमिति ।

एकासने चक्रमध्ये निविष्टा ये नराधमाः ।
भुञ्जाना एकपात्रे वा ते पतन्ति सुदारुणे ॥
एकेन चषकेनापि ये पिबन्ति परामृतम् ।
ते यान्ति नरकं घोरं मोहादज्ञानतोऽपि वा ॥
विना मन्त्रेण या पूजा विना मांसेन तर्पणम् ।
विना शक्त्या च यत्पानं तत्पानं निष्फलं भवेत् ।
स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुमाश्रिताम् ।
पाययित्वा पिबन्मद्यमिति शास्त्रस्य निर्णयः ॥

न पद्भ्याञ्च स्पृशेत् पात्रं न बिन्दुं पातयेदधः ।
नैकहस्ते न दातव्यं न मुद्रावर्जितं पुनः ॥
नार्पयेदेकहस्तेन न पिबेदेकपाणिना ।
साधारं नोद्धरेत् पात्रं साधारेषु विनिक्षिपेत् ॥
पात्रं न चालयेत् स्थानात् न कुर्यात् पात्रसङ्करम् ।
सशब्दं न पिबेद् द्रव्यं तथा चैव न पूरयेत् ॥
न स्थूलं नैव सूक्ष्मं च पात्रं कुर्यान्मनोहरम् ।
उच्छिष्टो न स्पृशेच्चक्रे कुलद्रव्याणि सुन्दरि ॥
बहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् ।
निष्ठीवनमधोवायुं चक्रमध्ये विवर्जयेत् ॥
चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि ।
दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेद् बुधः ॥
स्वपात्रस्थितहेतुं च न दद्याद् भैरवाय च ।
वने च सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका ॥
परिहासं प्रलापञ्च वितण्डां बहुभाषणम् ।
औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् ॥
श्रीचक्रे गतवृत्तान्तं शुभं वा यदि वाऽशुभम् ।
प्रभाते तन्न वक्तव्यमित्याज्ञा शम्भुना कृता ॥
नान्योऽन्यं ताडयेत् पात्रं न पात्रं पातयेदधः ।
उच्छिष्टं भक्षयेत् स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत् ॥
चक्रमध्ये च निय(ई)तमन्यथापतनं भवेत् ।
कनिष्ठेभ्यः स्वशिष्येभ्यो दद्यादुच्छिष्टमेव हि ॥
दद्यात् स्नेहेन योऽन्येभ्यः स भवेदापदां पदम् ।
शक्त्युच्छिष्टं पिबेद् द्रव्यं वीरोच्छिष्टञ्च चर्वणाम् ॥
शक्तिवीरप्रसादेन किन्न सिद्धयति भूतले ॥
मुने शृणु कुलाचारे सुधां पीत्वा मुहुर्मुहुः ।
पतितस्य च तस्याङ्गे गलन्ति यदि रेणवः ॥

तावत्कालं रेणुसंख्या देवीलोके महीयते ।
पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ॥
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।
पीत्वाऽऽलिङ्ग्य कुलाचारे प्रमदां यौवनान्विताम् ॥
कोटिजन्मार्जितं पापं तत्क्षणादेव नाशयेत् ।
पीत्वा पीत्वा जपित्वा च मुक्तः कोटिकुलैः सह ॥
ब्रह्मलोके वसेद् देवि सत्यं सत्यं न संशयः ।
जायते साधकः श्रेष्ठो महायोगी महासुखी ।
चिरजीवी जरामुक्तो विमुक्तः सर्वपातकैः ॥
तत्रैव लयमाप्नोति न पुनर्जायते भुवि ।
पीत्वाग्निहोत्रं हुत्वा च त्रैलोक्यैश्वर्यभाजनः ॥
बला अतिबलास्या च सिद्धिद्वयमवाप्य च ।
अणिमादियुतोऽपि स्यात् सत्यं सत्यं न संशयः ॥

अथ शान्तिस्तोत्रम् । तदुक्तं **यामले**—

पीत्वा सङ्गिजनैः सार्धं शान्तिस्तोत्रं पठेत् ततः ।

'यस्यार्चनेन विधिना किमपीहलोके' इत्यादि सम्पूर्णं शान्तिस्तोत्रं पठेत् । ततो देवीं प्रणम्य भूमौ पात्रं न्युब्जीकृत्य तत्र पुष्पं निक्षिप्य भूमिगतामृतेन वामहस्तस्य कनिष्ठाङ्गुलिना मायाबीजं विलिख्य तिलकं कुर्यात् । मूलमुच्चार्य ।

यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा ।
स एव दासतां याति यदि शक्रसमो भवेत् ॥

तदुक्तं **तन्त्रराजे**—

न्युब्जीकृत्वा ततः पात्रं पुष्पं तत्र क्षिपेद् बुधः ।
ततोऽमृतस्निग्धभूमौ मायाबीजं विलिख्य च ॥ १ ॥
कनिष्ठाङ्गुलिना वामहस्तस्य तिलकं यथा ।
यं यमित्यादि नाम श्रीमूलाद्येन समाहितः ॥ २ ॥
प्रक्षाल्य गोपयेत् पात्रं तत्त्वचिन्तापरो भवेत् ।

ततः शक्तियागस्यावश्यकत्वाद् यागो निरूप्यते ।

तदुक्तं **कुलचूडामणौ—**

सुधाभाण्डसहस्रेण मांसभाण्डशतेन च ।
विना शक्त्या न सिद्ध्येत तस्माच्छक्तिं समाश्रयेत् ॥ १ ॥

निरुत्तरतन्त्रेऽपि—

तीर्थभाण्डसहस्रेण पलभारशतेन च ।
न सन्तुष्टा वरारोहे भगलिङ्गामृतं विना ॥

अथवा विशोधनम् । तदुक्तं **भावचूडामणौ—**

अदीक्षितकुलसङ्गात् सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणं चैतत् स्यात् तदल्पगमनं यदि ॥
सकुलीनः कथं देवि पूजयेत् परमेश्वरीम् ।

अभिषेकाद् भवेच्छुद्धिः मन्त्रस्योच्चारणाच्छ्रुतौ ॥
बलादुत्कामतो वापि अभिषेकं समारेचत् ।
सुरया रेतसा वापि जलेन मनुनाऽथवा ॥ (?)
सम्भोगे अभिषिञ्चेन्नारीं चण्डीं मन्त्रवर्जिताम् ।
आदौ बालां समुच्चार्य त्रिपुरायै समुच्चरेत् ॥
नमः शब्दं समुच्चार्य इमां शक्तिं ततो वदेत् ।
पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु प्रिये ॥
वह्निजायां समुच्चार्य शुद्धिमन्त्रः सुरेश्वरि ।
तस्याः कणेऽभेदबुद्ध्या मायाबीजं समुच्चरेत् ॥

इति शक्तिशोधनम् । ततस्तां नग्नां समुपवेश्य तदङ्गे पूजा यथा— द्रांद्राविण्यै नमः ॥ १ ॥ द्रीं क्षोभिण्यै नमः ॥ २ ॥ इति पादयोः । क्लीं आकर्षिण्यै नमः । इति गुह्ये । ब्लूँ वशीकरण्यै नमः । इति बाहुमूले । सः सम्बोधिन्यै नमः इति हृदि । क्लीं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा । इति योनिमध्ये । ह्रीं कामराजाय नमः । इति ललाटे । क्लीं मन्मथाय नमः । इति वदने । ऐं कन्दर्पाय नमः । इति पुनः हृदि । ब्लूं मकरध्वजाय नमः । इति नाभौ । स्त्रीमनोभवाय नमः इति पुनर्गुह्ये । ऐं चान्द्र्यै नमः । ऐं सौन्दर्यै नमः । ऐं आग्नेय्यै नमः । इति योनिमध्ये । ततः तत्रैव मूलदेवीं सम्पूज्य स्वलिङ्गं पूजयित्वा । ततो होमं कृत्वा देवीं विसृज्य निर्माल्यं मस्तके धृत्वा यन्त्रलेप ब्रह्मरन्ध्रे धृत्वा नैवेद्यं साधकेभ्यो दत्वा किञ्चित् प्रसादं स्वीकृत्य सोऽहमिति भावयन् बाह्यतो वैष्णवाचार प्रत्यस्त (?) तदनुज्ञां लब्ध्वा यथासुखं विहरेप् । तदुक्तं **भैरवतन्त्रे—**

संशोध्य विधिवद् भक्त्या दिग्वस्त्रां तां तु कारयेत् ।
तदङ्गे पूजयेद् भक्त्या विधिवत् साधकोत्तमः ॥
द्रां द्राविणीं दक्षपादे द्रीं क्षोभिणीं च वामके ।
क्लीं आकर्षिणीं गुह्ये च व्लूं वशीकरणीं ततः ॥
बाहुमूले तु सम्पूज्य सः सम्बोधिनीं च वक्षसि ।
कामबीजं समालिख्य मायाबीजं लिखेत् सुधीः ॥
नित्यक्लिन्ने सुमुच्चार्य मद्द्रवे च ततः परम् ।
वह्निजायां समुच्चार्य योनिमध्ये प्रपूजयेत् ।
ह्रीं कामराजं ललाटे क्लीं मन्मथं मुखपङ्कजे ।
व्लं मकरध्वजं नाभौ रों कन्दर्पं पुनर्हृदि ॥
स्त्रीं ( ) च मनोभवं देवि पुनर्गुह्ये प्रपूजयेत् ।

ललितातन्त्रे—

भगे तदीये विज्ञेयाः पूजयेत् तास्तुसाधकः ।
अम्बरं श्रावति चान्द्री मापुष्यं श्रवति भानवी ॥ १ ॥
बीजं श्रवति चाग्नेयी तास्तु नामभिरर्चयेत् ।
वाग्भवाद्यैर्नमोयुक्तैः पूजयेत् सुप्रसन्नधीः ॥ २ ॥

उत्तरतन्त्रे—

स्वकल्पोक्तविधानेन मूलदेवीं ततः परम् ॥
पूजयेन्मदनागारे रक्तचन्दनचर्चिते ॥ १ ॥
इहाप्यावाहनं नास्ति जीवन्यासो महेश्वरि ।
अथैवं च विधानेन तां षोडशोपचारकैः ॥ २ ॥
इष्टदेवीं प्रपूज्याथ सर्वसिद्धीश्वरो भवेत् ।
अर्चयेद् गन्धपुष्पाद्यैः स्वशिवं तदनन्तरम् ॥ ३ ॥
पूजामन्त्रं ततः ओं नमः शिवाय तदनन्तरम् ।
तदनुज्ञां ततो लब्ध्वा दत्वा ताम्बूलमेव च ॥
शिवं च तत्र निक्षिप्य गजतुण्डाख्यमुद्रया ॥

उत्तरतन्त्रे—

पूजयेच्छोभरहितश्चाष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि प्रजपेत् स्थिरमानसः ॥ १ ॥
जप्त्वा मन्त्रञ्च देवेशि होमं कुर्यात् समाहितः ।
ॐ योनि चैतन्यरूपाग्नौ हविषा मनसो शुचा ॥ २ ॥

ज्ञानप्रदीपिते नित्यमक्षवृत्ति जुहोम्यहम् ॥
वह्निजायान्तमन्त्रेण दद्यात् (चैव) त्रयाहुतिम् ॥ ३ ॥
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा शुचा ।
शुषुम्ना वर्त्मना नित्यमक्षवृत्ति जुहोम्यहम् ॥
स्वाहान्तो होममन्त्रोऽयं प्रति हुत्वा हुर्ति मुने ॥
प्रकाशकोशहस्ताभ्यामवलम्ब्योन्प्रतीश्रुचा (?) ॥
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ॥
स्वाहान्तोऽयं महामन्त्रः शुक्रत्यागे प्रकीर्तितः ॥

ज्ञानार्णवे—

शिवशक्तिसमायोगो योग एव न संशयः ।
सीत्कारो मन्त्ररूपं च वचनं स्तवनं भवेत् ॥ १ ॥
आलिङ्गनं च कस्तूरी कर्पूरं चन्दनं भवेत् ।
नखदंष्ट्राक्षतादीनि पुष्पाणि विविधानि च ॥ २ ॥
मथनं तर्पणं विद्धि बीजपातो विसर्जनम् ।
संयोगे जायते सौख्यं परमानन्दलक्षणम् ।
गलच्चन्द्रद्रवं तस्माद् गृहीत्वा साधकोत्तमः ॥ १ ॥
अर्घ्यस्थापनपञ्चाङ्गचन्दनादियुतो भवेत् ।
तेनामृतेन ते सर्वे परं तुष्टा भवन्ति हि ॥ २ ॥
यत् कामं कुरुते मन्त्रो तत्क्षणादेव सिद्ध्यति ।
इति ते कथितं ज्ञानं सारं रम्यं वरानने ॥ ३ ॥
खविकल्पस्तु सततं पापभाक् जायते नरः ।
विचिकित्सापरो मन्त्री जायते गुरुतल्पगः ॥
अत एव वरारोहे निर्विकल्पः सदा भवेत् ॥

कालीतन्त्रे--

विवर्ज्य परया भक्त्या सन्निधापनमुद्रया ।
उद्वास्य हृदये देवीं तन्मयो भवति ध्रुवम् ॥
निर्माल्यं मस्तके धार्यं सर्वाङ्गे चानुलेपनम् ।

कूलचूडामणौ—

ब्रह्मरन्ध्रे गुह्यस्थाने यन्त्रलेपस्तु धारयेत् ।
नास्तिकेभ्यो न मूर्खेभ्यो न पशुभ्यो न वा द्विजे ॥ १ ॥

कुलीनाय प्रदातव्यमथवा जलमध्यतः (मध्यके) ।
नैवेद्यं चोपभुञ्जीत दत्वा तद्भक्तिशालिने ॥ २ ॥

यामले नैवेद्यम्—

नैवेद्यं त्रिपुरादेव्याः वाञ्छन्ति विबुधाः सदा ।
तस्माद् देयं सुरश्रेष्ठ ब्रह्मणे विष्णवेऽपि च ॥ १ ॥
मद्यं शक्राय सूर्याय गणेशाय यमाय च ।
वरुणाय वह्नये च वायवे च धनाय च ॥ २ ॥
ईशानाय महादेवि साधकाय प्रदापयेत् ।

त्रिपुरेत्युपलक्षणम् ।

पानं तु त्रिविधं देवि दिव्यवीरपशुक्रमात् ।
दिव्यं देव्यग्रतः पानं वीरं वीरासने स्थितम् ॥
असंस्कृतं पशोः पानं कलहोद्वेगकारकम् ।
संस्कृतं सिद्धिजनकं प्रायश्चित्तविशोधनम् ॥
मन्त्राणां स्फुरणं तेन महापातकनाशनम् ।
संस्कारसंस्कृतं द्रव्यं गुरुदेवार्पितं प्रिये ॥
ये पिबन्ति जना धीरास्तेषां पातो न विद्यते ।
आयुः श्रीः कान्तिः सौभाग्यं ज्ञानं संस्कृतपानतः ॥
अष्टैश्वर्यप्रेरकत्वं पतनं विधिवर्जनात् ।
ततः सोऽहमिति ध्यात्वा वैष्णवाचारतत्परः ॥
हरिनामजातभावो भवार्थी न विचेष्टितः ।
चौरवद् विहरेदेकः सदा सङ्गविवर्जितः ॥

इति श्रीचन्द्रशेखरविरचिता कूलपूजनचन्द्रिका समाप्ता ।

यामल—

आलिङ्गनं चुम्बनं च स्तनयोर्मर्दनं तथा ।
दर्शनं स्पर्शनं योनेर्विकारं लिङ्गघर्षणम् ।
प्रवेशः स्थापनं शक्तेर्नव पुष्पाणि पूजने ॥

संस्कृतं पयोः पानं कलहोद्वेगकारकं ।। संस्कृतं सिद्धिजनकं प्रापश्चित्तविशोधनं
मंत्रांकुरणं तेन महापातकनाशनं ।। संस्कार संस्कृतं द्रव्यं गुरुदेवार्पितं प्रिये ।। ये
पिवंति जना धीरास्ते पापात्तो न विघ्नते ।। आयुःश्रीकीर्तिसौभाग्यज्ञानं संस्कृतपा
नतः ।। ऐष्ठैश्वर्यप्रेरकत्वं पतनं विघ्नवर्जनात् ।। ततः सोहमिति ध्यात्वा वैष्णवाचा
रतत्परः ।। हरिनामजातलभावोभवार्थीन विवेष्ठितः ।। चौरवद्धि हरेदेकः सदा
संगाविवर्जितः ।। इति श्री चंद्रशेखरविरचिता कुलरहस्यपूजनचंद्रिका समाप्ता ।

कुलपूजनचन्द्रिकास्थ ग्रन्थ-ग्रन्थकृतामनुक्रमणिका

कुलपूजनचन्द्रिकास्थश्लोकानामाकराद्यनुक्रमणिका

हमारी तंत्रशास्त्र पर छपी पुस्तकें :—

1.	कामाख्या तंत्र-विश्वनारायण शास्त्री, चित्रों सहित	75.00
2.	ताराभक्तिसुधार्णव-आर्थर ऐवालान	200.00
3.	ब्रह्मसंहिता-विष्णुसहस्रनाम सहित-आर्थर ऐवालान	75.00
4.	कौलावलि निर्णय-आर्थर ऐवालान	75.00
5.	शतरत्न संग्रह-आर्थर ऐवालान	50.00
6.	योगिनी तंत्र-विश्वनारायण शास्त्री	125.00
7.	Tantra Paddhati-N.P. Unui	75.00
8.	Tara : (The Supreme Goddess)-Dr. Pushpender Kumar	500.00
9.	श्रीतंत्रभिधानम्-आर्थर ऐवालान	75.00

BHARATIYA VIDYA PRAKASHAN

1, U.B. Jawahar Nagar,
Bungalow Road,
Delhi-110007 (INDIA)

Post Box 1108,
Kachauri Gali,
VARANASI-221001